एतत् ? जुहोतिशब्दात् "मासमग्निहोत्रं जुहोतीति" जुहोतिशब्दोऽत्र भवति न चासौ सोमयागेषु प्रसिद्धः तस्मान्न सोमा इति" संव्या०। "काममितरे" सू०। "इतरे तर्हि दर्शपूर्णमासादयो भवन्तु सोमाः न हि तत्र जुहोतिशब्द इति नेत्युच्यते दर्शपूर्णमासादयः शब्दा निरुपपदा एव दर्शपौर्णमासादीन् सोमान् प्रथयन्ति सोमोपपदाः निरुपपदाश्चैते मासं दर्शपौर्णमासाभ्यामिति तस्माद्दर्शपौर्णमासादयोऽपि न सोमा एते" संव्या०। दर्शपौर्णमासादयः कामं सोमा भवन्तु यतस्तत्र जुहोतिशब्दोनास्ति परमार्थतस्तु तेऽप्यत्र सोमा न भवन्ति यतो दर्शपूर्णमासादयः शब्दा निरुपपदा अत्र श्रूयन्ते न चातुर्मास्यसोमा दर्शपूर्णमाससोमा इत्येवं सोमोपपदाः अतस्तेऽपि न सोमा इति सिद्धान्तः। एवं षण्मासाः परिपूर्णाः मासश्चात्र सर्वत्र सावनस्त्रिंशदहात्मकः अथोत्तरेषु षट्सु मासेष्वहान्याह" कर्कः। "इतिगतवतोरयनपूर्वपक्षेण षण्मासान्" सू०। "इतिवातवतोरयनस्य पूर्वपूर्वपक्षेण षण्मासान् नयेयुः। तत्र विशेषमाह" कर्कः "उत्तमे त्रयोऽभिप्लवा दशरात्रो महाव्रतम्" सू०। "उत्तमे द्वादशे मासि एतान्यहानि भवन्ति" संव्या०। "उपरिष्टादतिरात्रं भवति" सू०। "अनुग्रहश्रुतेः यदन्यतरतोऽतिरात्रस्तेनाहीन इति" देव० "अन्ते एक उदयनीयातिरात्र एव भवति न प्रायणीय इत्यर्थः" कर्कः। "उभयतो वा" सू० "अतिरात्रो भवति सत्त्वात् अनुग्रहश्रुतिस्तु अहीनत्वेन संस्तौति तत्कथम् ? हविर्यज्ञैर्व्यवहितत्वात्" देव० "अथवोभयतोऽतिरात्रं भवति प्रायणीयश्चोदयनीयश्चात्र द्वावपि भवत इत्यर्थः" संव्या०। "हविर्यज्ञेभ्योऽतिरात्रमेके सोमानन्तर्यात्" सू० हविर्यज्ञेभ्योऽवसितेभ्यः एके प्रायणीयमतिरात्रमिच्छन्ति एवं सोमानन्तर्यं भवतिए के तन्नेच्छन्ति अग्नीषोमीयोत्तरकालता हि तस्य प्रकृतौ दृष्टा इहापि तद्वदेव तस्मात् प्रागेव हविर्यज्ञेभ्यः प्रायणीयः" कर्कः उभयतोऽतिरात्रपक्षे प्रायणीयमतिरात्रमेके आचार्याः "हविर्यज्ञेभ्योऽग्निहोत्रदर्शपूर्णमासचातुर्मास्यपर्वभ्यः परं कुर्वन्ति एवं हि सर्वेषां सोमयागानामानन्तर्यमव्यवधानं कृतं भवति इतरया हविर्यज्ञैर्व्यवधानं स्यात् एके एतन्न वाञ्छन्ति यतः प्रकृतौ प्रायणीयस्याग्नीषोमीयोत्तरकालता दृष्टा इहापि च तद्वदेवानुष्ठानं युक्तम् तस्माद्धविर्यज्ञेभ्यः पूर्व एव प्रायणीयो भवति। अन्येभ्यः सत्रेभ्योऽत्र विशेषमाह" संव्या०। "अत्सरुकाः कुण्डप्रतिरूपाश्चमसाः" सू०। अत्सरुकाः अष्टलका कुण्डप्रतिरूपाः वृत्ताकाराः कर्कः। "अत्र अत्सरुका अष्टला मूलज्ञापकचिह्नदण्डरहिताः कुण्डप्रतिरूपाः कुण्डाकारा वृत्ताश्च भवन्ति" संव्या०। "पञ्चर्त्विजस्त्रीणि त्रीणि कर्माणि कुर्युः" सू०। "अत्र कुण्डपायिनामयने वक्ष्यमाणाः पञ्चर्त्विजस्त्रीणित्रीणि कर्माणि कुर्वन्ति त्रयाणांत्रयाणामृत्विजां कर्माणि एकैकः करोति" संव्या० "होताध्वर्युपोत्रीये च" सू०। "चशब्दाद्धौत्रं च" कर्कः। "उद्गाता नैष्ट्राच्छावाकीये" सू०। "मैत्रावरुणो ब्रह्मत्वप्रातिहर्त्त्रे"। "प्रस्तोता ब्राह्मणाच्छंसिग्रावस्तोत्रीये" सू०। "सर्वत्र प्रथमान्तः कर्ता" संव्या० "प्रतिप्रस्थाताग्नीध्रौन्नेत्रे" सू०। "चकारश्च वेत्रानुवर्त्तते" कर्कः। "मुख्यासनेभ्योऽनुसंसर्पमितराणि" सू०। "आसनशब्दः स्थानवाची मुख्यस्थानेभ्यः अनु सृप्त्वा-सृप्त्वा परकीयाणि कर्माणि कुर्युः स्वकर्मकर्त्तृकस्य चरितार्थत्वात्" कर्कः।

**कुण्डपायिनामयनन्याय** पु० जैमिन्युक्ते कुण्डपायिनामयननामकसत्रेऽग्निहोत्रपदस्य प्रकृताग्निहोत्रात् कर्मान्तरत्वप्रतिपादके न्यायभेदे स च न्यायो जै०सू० दर्शितोयथा "प्रकरणान्तरे प्रयोजनान्यत्वम्" जै०सू०। "कुण्डपायिनामयने श्रूयते—सायम् अग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजते" इत्येवमादि। तत्र सन्दिह्यते,—किं नियते अग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोर्मासो विधीयते कालः? अथ किं नियताग्निहोत्रात् नियताभ्याञ्च दर्शपूर्णमासाभ्यां कर्मान्तरविधानम् ?—इति। किं तावत् प्राप्तं ?—नियतेषु कालविधिः इति कुतः ? कालविधिसरूप एष शब्दोमासमिति। कथं कालविधिसरूपता ?। यत् अग्निहोत्रं जुहोति—इति विदितं, मासमित्यविदितम्। एवं च अग्निहोत्रशब्दो दर्शपूर्णमासशब्दश्च न अर्थान्तरवृत्ती भविष्यतः तस्मात् कालविधिः। ननु कुण्डपायिनामयनप्रकरणं बाध्येतैवम्'। कामं बाध्यतां, वाक्यं हि बलवत्तरम्। एवं प्राप्ते ब्रूमः,—प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवितुमर्हति। ननु प्रत्यक्षोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च गुणविधिः। न,—इत्युच्यते। कथम् ?। उपसद्भिश्चरित्वेति हुत्वा इदमभिधीयते, न च, उपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति। तस्मात् अशक्यः तत्र मासविधिः 'अथ उच्येत,—उपसदोऽपि विधीयन्ते'—इति। तथा गुणविधानार्थेऽस्मिन् वाक्ये अनेकगुणविधानात् वाक्यम् भिद्येत! अस्मिन् पक्षे पुनरतन्त्रम् अग्निहोत्रशब्दो न